तृतीयः पाठः
३


# आकारान्त-स्त्रीलिङ्गशब्दप्रयोगः


दुर्गा


छात्रा


अध्यापिका



वृद्धा


बालिका


पाठशाला


घटिका



पाकशाला



अग्निपेटिका



माला



दिनदर्शिका



शाटिका



पादरक्षा



मक्षिका


पिपीलिका



चटका



अजा



मापिका


तुला



नौका


लता


गौशाला



द्राक्षा


वीणा


उत्पीठिका


स्थालिका



जवनिका



कुञ्चिका



सिक्थवर्तिका



द्विचक्रिका


## वचन-प्रयोगः



बालिका



बालिके



बालिकाः



अजा



अजे



अजाः



चटका


चटके



चटकाः


पिपीलिका


पिपीलिके


पिपीलिकाः


द्विचक्रिका


द्विचक्रिके


द्विचक्रिकाः

## क्रिया-प्रयोगः



बालिका खेलति।



बालिके खेलतः।



बालिकाः खेलन्ति।



अजा पिबति।



अजे पिबतः।



अजाः पिबन्ति।



छात्रा नमति।



छात्रे नमतः।



छात्राः नमन्ति।

| | | |
|---|---|---|
| महिला पचति। | महिले पचतः। | महिलाः पचन्ति। |
| चटका कूजति। | चटके कूजतः। | चटकाः कूजन्ति। |
| गायिका गायति। | गायिके गायतः। | गायिकाः गायन्ति। |
| वृद्धा वदति। | वृद्धे वदतः। | वृद्धाः वदन्ति। |
| शिक्षिका लिखति। | शिक्षिके लिखतः। | शिक्षिकाः लिखन्ति। |


## अभ्यासः

### १. चित्रं दृष्ट्वा नाम लिखत –



..........................


..........................



..........................



..........................



..........................


..........................


### २. चित्रं दृष्ट्वा उचितं वचनप्रयोगं कुरुत–


छात्रा



..........................



..........................



..........................


द्विचक्रिके


..........................


..........................


..........................


कुञ्चिकाः

### ३. चित्रं दृष्ट्वा उचित-क्रियापदेन रिक्तस्थानानि पूरयत –








अजाः ................ । महिले ................ । शिक्षिका ................ ।

### ४. उदाहरणानुसारं रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा – | अजा | अजे | अजाः |
| | माला | ................ | ................ |
| | ................ | स्थालिके | ................ |
| | शाटिका | ................ | ................ |
| | ................ | ................ | पिपीलिकाः |
| | ................ | अध्यापिके | ................ |
| | ................ | ................ | उत्पीठिकाः |

### ५. क्रियापदानाम् उचित-वचनरूपैः रिक्तस्थानानि पूरयत –

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा – | खेलति | खेलतः | खेलन्ति |
| | पिबति | ................ | ................ |
| | ................ | नमतः | ................ |
| | ................ | ................ | पचन्ति |
| | गायति | ................ | ................ |
| | ................ | कूजतः | ................ |
| | ................ | ................ | वदन्ति |

## ६. कोष्ठकात् उचितं क्रियापदं चित्वा रिक्तस्थानानि पूरयत -

(क) गायिका .................................... । (गायति/गायतः/गायन्ति)

(ख) चटके .................................... । (कूजति/कूजतः/कूजन्ति)

(ग) मालाः .................................... । (अस्ति/स्तः/सन्ति)

(घ) अध्यापिकाः .................................... । (आगच्छति/आगच्छतः/आगच्छन्ति)

(ङ) पिपीलिके .................................... । (चलति/चलतः/चलन्ति)

## ७. कोष्ठके प्रदत्त-शब्दस्य उचितं वचनप्रयोगं कृत्वा वाक्यानि पूरयत -

**यथा** - बालिकाः नमन्ति। (बालिका)

(क) ............................ लिखतः। (अध्यापिका)


(ख) ............................ गच्छन्ति। (पिपीलिका)

(ग) ............................ गायति। (गायिका)

(घ) ............................ वदन्ति। (महिला)

(ङ) ............................ पठतः। (छात्रा)

## ८. चित्रस्य अभिज्ञानं कृत्वा वचनरूपाणि लिखत-

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| १.  | ............. | ............. | ............. |
| २.  | ............. | ............. | ............. |
| ३.  | ............. | ............. | ............. |
| ४.  | ............. | ............. | ............. |

## योग्यता-विस्तारः

१. **ध्यानेन पठत अवगच्छत च -**

र् + अ + म् + आ = रमा

ब् + आ + ल् + इ + क् + आ = बालिका

अ + ध् + य् + आ + प् + इ + क् + आ = अध्यापिका


एते सर्वे स्त्रीलिङ्गशब्दाः। एतेषाम् अन्ते 'आ' (आकारः) अस्ति, अतः एते आकारान्त-स्त्रीलिङ्गशब्दाः सन्ति।

> येषां स्त्रीलिङ्गशब्दानाम् अन्ते आकारः भवति, ते आकारान्त- स्त्रीलिङ्गशब्दाः भवन्ति । यथा- रमा, अजा, शाटिका, इत्यादयः।


२. युष्माकं कक्षायां कुटुम्बे वा यासां नामानि आकारान्त- स्त्रीलिङ्गे सन्ति, तासां नामानि लिखत।


३. अस्मिन् पाठे युष्माभिः आकारान्त-स्त्रीलिङ्गशब्दाः पठिताः। युष्माकम् अभ्यासाय अन्ये केचन स्त्रीलिङ्गशब्दाः अत्र सन्ति -


देवी


लेखनी



अङ्कनी


कर्तरी


द्रोणी


घटी


जलकूपी


नदी


नर्तकी

४. एतेषां शब्दानाम् अन्ते ईकारः (ई) अस्ति ।

**यथा** - द् + ए + व् + ई = देवी

ल् + ए + ख् + अ + न् + ई = लेखनी

न् + अ + द् + ई = नदी

५. एते सर्वे ईकारान्त-स्त्रीलिङ्गशब्दाः सन्ति । एतेषां वचन-प्रयोगः अनेन प्रकारेण भवति -

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| देवी | देव्यौ | देव्यः |
| लेखनी | लेखन्यौ | लेखन्यः |
| अङ्कनी | अङ्कन्यौ | अङ्कन्यः |
| नर्तकी | नर्तक्यौ | नर्तक्यः |

६. एतेषां क्रिया-प्रयोगः अनेन प्रकारेण भवति -

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| नर्तकी नृत्यति । | नर्तक्यौ नृत्यतः । | नर्तक्यः नृत्यन्ति । |
| देवी अस्ति । | देव्यौ स्तः । | देव्यः सन्ति । |
| भगिनी लिखति । | भगिन्यौ लिखतः । | भगिन्यः लिखन्ति । |

## वर्ण-विलासः

**ध्यानेन पठत-**

माला = म् + आ + ल् + आ

म् + आ = मा ; ल् + आ = ला

म् + अ + क् + ष् + इ + क् + आ = मक्षिका

ग् + औ + श् + आ + ल् + आ = गौशाला

ल् + इ + ख् + अ + त् + अ + : = लिखतः

बालिका, द्राक्षा, जवनिका, नमन्ति - एतेषां पदानाम् अपि वर्णविच्छेदं कुरुत।